RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

॥ ओ३म् ॥

श्रुत्वा धर्मं विजानाति
श्रुत्वा त्यजति दुर्मतिम्।
श्रुत्वा ज्ञानमवाप्नोति
श्रुत्वा मोक्षमवाप्नुयात्॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

यस्यार्थास्तस्य मित्राणि
यस्यार्थास्तस्यवान्धवा:।
यस्यर्था: सा पुमाल्लोके
यस्यार्था: स च पण्डित:।

( चाणक्य-नीति )

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-८ 卐 अंक:-४ ( १७० ) 卐 १६ अगस्त: २०१८ त: ३१ अगस्तमास: २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## स्वतन्त्रतादिवसे लालकिलात: प्रधानमन्त्रिणो नरेन्द्रमोदिनोऽभिभाषणम्

नवदेहली। 15-8-2018 तमे दिनाङ्के राष्ट्रं द्विसप्तितमीं स्वतन्त्रतावर्षपूर्णिमामानयति। प्रधानमत्रिणा राष्ट्रं सम्बोधितम्। स्वकीये भाषणे ते स्वप्रशासनस्य विषये उक्तवान्। ते



उक्तवन्त: राष्ट्रस्य समग्रविकास:2022 तमवर्षं अवश्यमेव भविष्यति। तत्र सक्षम-स्वस्थ-श्रेष्ठ-स्वाभिमान-सम्पन्न, स्वावलम्बि भारतस्य निर्माणं भविष्यति। ते उक्तवन्त: न्यायपालिका अतिरिक्तभारमुक्ता: स्यात् एवं ते जातिवादे-सम्प्रदायवादे प्रहारं कृतवन्त:। कृषकानां विषये, विशेष रूपेणोक्तम्। तेषां बृहद धोषणाऽस्ति अन्तरिक्ष विषये, सेनाविषये, प्रधानमन्त्रिजनारोग्ययोजना विषये कार्य भविष्ययित।

## दिल्ली-संस्कृत-अकादमीमाध्यमेन स्वतंत्रतादिवसस्य समुपलक्ष्ये राष्ट्रिय-संस्कृत-कवि-सम्मेलनस्यायोजनम्

नवदेहली। दिल्ली-संस्कृत-अकादमी स्वतंत्रतादिवसस्य उपलक्ष्ये राष्ट्रियसंस्कृतकवि सम्मेलनस्यायोजनमकरोत्। सम्मेलनस्य मुख्यातिथि डॉ गणेशदत्त शर्मा उक्तवान यत् भारतस्य साहित्यिक सांस्कृतिक, धार्मिक, आध्यात्मिक, नैतिक, राजनैतिक एवं ऐतिहासिक जीवनस्य व्यवस्था संस्कृत भाषाया: साहित्ये उपलब्धोऽस्ति। संस्कृत भाषाया: ज्ञान-विज्ञानेनैव भारतस्येतिहास:




गौरवशाली वर्तते। कार्यक्रमस्य अध्यक्षता अकादम्या: उपाध्यक्षा डॉ.कान्ताभाटिया उक्तवती यत् विश्वस्या वह्वी भाषा एवं संस्कृति: विलुप्तो अभवत्। परञ्च भारतीय संस्कृति अद्यापि सम्पूर्ण विश्वे स्व गौरव एवं महत्वेन सह विद्यमानोऽस्ति। एतस्य मूलं संस्कृतभाषाशस्ति। अस्मिन्नवसरे काव्यपाठी कविषु दिल्लीत: डॉ रमाकान्तशुक्ल, डॉ. भागीरथीनन्द, डॉ. परमानन्द झा, चण्डीभढ़त: प्रो. जगदीशप्रसादसेमवाल, उत्तरप्रदेशत: डॉ. नवलता, डॉ. अंजूरानी, डॉ. प्रशस्यमिश्रशास्त्री, राजस्थानत: डॉ. प्रवीनपाण्ड्या आदि कवय: देशस्य स्वतंत्रता अवसरे स्वकाव्यपाठ प्रस्तौतम्। अस्मिन्नवसरे दिल्ली विश्वविद्यालयस्य सेन्टस्टीफन्स महाविद्यालस्य संस्कृत विभागाध्यक्ष डॉ. आशुदयालमाथुर:, डॉ. पंकजकुमारमिश्र: सहित अन्य गणमान्य जना: उपस्थिता: आसन्।

**द्विसप्ततितम स्वतंत्रतादिवसस्योपलक्ष्ये संस्कृतसंवादपत्रिकाया: पक्षत: पाठकेभ्य समस्तदेशवासिभ्य च स्वतंत्रतादिवसस्य शुभकामना: ।**

## साहित्य–अकादमी–तिरुपतिराष्ट्रियसंस्कृतविद्यापीठयो: संयुक्ततत्त्वावधानेन संस्कृतयुवलेखकसम्मेलनम्

तिरुपति:– भगवतो बैंकटेश्वरस्य पावननगरे तिरुपतौ संस्कृतयुवलेखकसम्मेलनं साहित्य–अकादमी–तिरुपतिराष्ट्रियसंस्कृतविद्यापीठयो: संयुक्ततत्त्वावधानेन अगस्तमासस्यास्य दशमैकादशयो: दिनांकयो: सुसम्पन्नम्। दर्शनीयेऽस्मिन् सम्मेलने देशस्य कोणेभ्य: युवकवय: समागता:




स्वकाव्यरसधाराभिस्तिरुपतिभूमिराप्लाविता। उद्घाटनसत्रे स्वागतभाषणं कुर्वता साहित्य–अकादमीसचिवेन श्रीमता के श्रीनिवासरावमहोदयेन संस्कृतसाहित्यं सर्वज्ञानविज्ञानसमृद्धमस्तीति निगदितम्। अस्मिन्नेव सत्रे पूर्वकुलपितना प्रो अभिराजराजेन्द्रमिश्रमहोदयेन महाकविना साहित्य–अकादमीसंस्कृतभाषापरामर्शण्डलीसंयोजकेन प्रारम्भिकमभिभाषणं संप्रदत्तम्। श्रीमिश्रेण संस्कृतजगति युवान: बहु सुन्दरं काव्यं रचयन्तो वर्तन्त इति भाषितम्। तैर्नवयुवका: स्वाशिषा भूरिश: कृपापात्रीकृता:। मुख्यातिथि: जनार्दनहेगडेमहोदय: स्वभाषणेन सर्वानपि व्यमोहयत्। अध्यक्षीयमभिभाषणं कुर्वता विद्यापीठस्य कुलपतिमहोदयेन वि मुरलीधरशर्ममहोदयेन सर्वेषामपि समागतानां हृदयानि हृतानि। धन्यवादार्पणं आर् एल् नरसिंहशास्त्रिमहोदयेन कृतम्। उद्घाटनसत्रस्यास्य संचालनं सुकविना डॉ.

**शेषभाग:द्वितीयपुटे**

## अखिलभारतीयसंस्कृतकविसम्मेलनम् संस्कृतपुस्तकवितरणसमारोहश्च

वार्ताहर: डॉ. हरीशचन्द्र गुरुरानी

हरिद्वारम्। उत्तराखण्ड-संस्कृत-अकादम्या (उत्तराखण्डसर्वकारेण) स्वतन्त्रतादिवसम् उपलक्ष्य संस्कृतभाषायां मधुरप्रेरणास्पदकाव्यरसास्वादनाय नवकाव्यसर्जनाय च अखिलभारतीयसंस्कृतकविसम्मेलनम् अगस्तमासस्य 11 दिनाङ्के शनिवासरे हरिद्वारे अकादम्या: सभागारे आयोजितम्।



अखिलभारतीयसंस्कृतकविसम्मेलनस्य उद्घाटनम् उत्तराखण्डशासनस्य संस्कृतशिक्षाया: सचिवा: डॉ. भूपिन्दर कौर औलखमहोदया:, अकादम्या: उपाध्यक्षा: प्रो. प्रेमचन्द शास्त्री, प्राचीनअवधूतमण्डलाश्रमस्य अध्यक्षा: स्वामिन: रूपेन्द्रप्रकाशमहाराजा:, अकादम्या: सचिव: गिरधरसिंह भाकुनी, कोषाध्यक्ष: नवीन नैथानी च दीपं प्रज्ज्वाल्य कृतवन्त:।

कार्यक्रमस्य मुख्यातिथय: उत्तराखण्डशासनस्य संस्कृतशिक्षाविद्यालीयशिक्षयो: सचिवा: डॉ.

**शेषभाग:द्वितीयपुटे**

**प्रथमपुटस्य शेषभागः**

## अखिलभारतीयसंस्कृतकविसम्मेलनम्.......

भूपिन्दर कौर औलखमहोदयाः उक्तवत्यः यत् संस्कृतभाषायाम् अस्माकं संस्कृतिः श्रेष्ठमानवस्य जीवनचर्या निहिता अस्ति। सहैव संस्कृते अस्माकं श्रेष्ठपरम्पराः, वैज्ञानिकतत्त्वानि निहितानि सन्ति। येज़ामाचरणेन मानवः कदापि दुःखम् असंशयं प्राप्तुं न शक्नोति। अतः अस्माभिः सर्वैरपि संस्कृतभाषा पठनीया।



कार्यक्रमस्य अध्यक्षतां कुर्वन्तः उत्तराखण्ड-संस्कृत-अकादम्याः उपाध्यक्षाः प्रो. प्रेमचन्द शास्त्रिमहोदयाः उक्तवन्तः यत् संस्कृतम् अस्माकं राष्ट्रस्य निधिः अस्ति। संस्कृतभाषा प्राचीनकालाद् विश्वस्य मार्गदर्शनं कुर्वती अस्ति। अस्माकमृषीभिः यज्ज्ञानं प्रदत्तं तज्ज्ञानं सम्प्रति विश्वे विज्ञानरूपेण सम्मुखं भवति। अधुना संस्कृतज्ञैः सम्भूय संस्कृतस्य विकासाय, अनुसन्धानाय, प्रचाराय, प्रसाराय च चिन्तनं करणीयं कार्यं च करणीयम्।

अकादम्या सचिवेन गिरधर सिंह भाकुनिना कथितं स्वतन्त्रतादिवसम् उपलक्ष्य अखिलभारतीयसंस्कृतकविसम्मेलने देशस्य त्रयोदश संस्कृतकवयः राष्ट्रवन्दनं संस्कृतस्य




प्रशंसां कुर्वन्तः काव्यपाठं कृतवन्तः। अवसरेऽस्मिन् अकादम्याः उत्तराखण्डराज्यस्य 46 संस्कृतमहाविद्यालयेभ्यः छात्राणां सुलभ्यै पाठ्यक्रमस्य पुस्तकानि प्रदत्तानि। अवसरेऽस्मिन् अकादम्याः परिसरे वृक्षारोपणं च कृतम्। सचिवेन भाकुनिना उक्तं यत् संस्कृतं बिना वयं भारतीयां संस्कृतिं ज्ञानं विज्ञानं च ज्ञातुं न शक्नुमः। अतः अस्माभिः संस्कृतस्य प्रचारः करणीयः।

कार्यक्रमस्य विशिष्टातिथयः प्राचीनावधूतमण्डलाश्रमस्य अध्यक्षाः श्रीस्वामिनः रूपेन्द्रप्रकाशमहाराजाः कथितवन्तः यत् अस्माकं देशस्य संस्कृतिः अद्यावधि प्रतिष्ठिता वर्तते यतोहि अस्याः संस्कृतेः आधारः अस्ति संस्कृतभाषा। संस्कृतस्य विकासः भवति चेत् भारते मानवता, धर्मः, संस्कृतिः, ज्ञानं चेत्यादिनां वर्धनं स्वतः भविष्यति।

अखिलभारतीयसंस्कृतकविसम्मेलने काव्यपाठं कुर्वता **देहलीप्रदेशस्य संस्कृतकविना पद्मश्रीविभूषितेन डॉ. रमाकान्त शुक्लमहोदयेन** 'भाति मे भारतं भाति मे भारतं' इति काव्यं गीत्वा जनाः प्रमोदिताः। **देहलीसंस्कृत-अकादम्याः सचिवेन डॉ. जीतराम भट्टमहोदयेन** 'प्रतिष्ठिता च भूतले तु भारतस्य संस्कृतिः' **राजस्थानस्य कौशल तिवारीमहोदयेन** 'तदस्माकं प्रियं भारतम्' **रायबरेलीनगरस्य हास्यसंस्कृतकविना डॉ. प्रशस्यमित्र शास्त्रिमहोदयेन** 'दैनन्दिनं प्रथित एष तु जातिवादः राष्ट्रे दृढो भवति सम्प्रति प्रान्तवादः' गौतमबुद्धनगरस्य कवयित्री डॉ. अन्जूरानी रतूडी उक्तवती 'देवसंगिनी संस्कृताज्ञा' **दूरदर्शनस्य समाचारप्रवाचकेन डॉ. चन्द्रभूशण झामहोदयेन** 'अवन्तिदेशभूतले कृपाम्बुवृष्टिकारकः' **लखनऊनगरस्य प्रो. रामसुमेर यादवेन** 'भूतले शोभते भारतीयो ध्वजः, **हरिद्वारस्य डॉ. निरंजन मिश्रेण** 'दुष्टजनानां मुखे चपेटां धार्त यो न जनो यतते, **डॉ. अरविन्दनारायण मिश्रेण** 'सामर्थ्यमखिलम् इयं नारी, **डॉ. प्रकाश चन्द्र पन्तेन** 'यतो यस्यास्ति दण्डः तस्य महिषी भुवि भवति अस्मिन्, **चम्पावतस्य डॉ. कीर्तिवल्लभ ष्टाक्टामहोदयेन** 'श्रीदेवभूमिं सदा, **देहरादूनस्य डॉ. राधेश्याम गंगवारेण** 'विचारयन्तु वस्तुतो गता क्व राष्ट्रचेतना, **हल्द्वानीनगरस्य डॉ. महेश जोशी**महोदयेन 'राष्ट्रगौरवं वयं वर्धायन् पदे पदे' चेति काव्यानि गीतानि।

अकादम्याः कोषाध्यक्षेण नवीन नैथिना अतिथीनां कवीनां धन्यवादः ज्ञापितः। कार्यक्रमस्य सञ्चालनं संयोजकः अकादम्याः शोधाधिकारी डॉ. हरीशचन्द्र गुरुरानी कृतवान्।

अवसरेऽस्मिन् अखिलभारतीयसंस्कृतछात्रप्रतियोगितानां सञ्चालनार्थं राज्यसंयोजकानाम् उपवेशनमपि सञ्जातम्। अस्मिन् उपवेशने छत्तीसगढराज्यस्य लक्ष्मणप्रसाद साहूः, हरियाणाराज्यस्य अजयकुमारः, हिमाचलस्य डॉ. मुकेशकुमार शर्मा, राजस्थानस्य डॉ. कौशल कुमारश्च राज्यसंयोजकाः उपस्थिताः आसन्।

कार्यक्रमेऽस्मिन् आचार्यकुलस्य ब्रह्मचारिभिः मनोहराणि स्वागतगीतानि संस्कृतगीतानि च प्रस्तुतानि। वैदिकमङ्गलाचरणं श्रीभारतीसंस्कृतविद्यालयस्य ब्रह्मचारिभिः कृतम्।

कार्यक्रमे अकादम्या कोषाध्यक्षः नवीन नैथानी, उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. पीयूषकान्त दीक्षितः, कुलसचिवः गिरीश कुमार अवस्थी, संस्कृतभारत्याः क्षेत्रीयसङ्घटनमन्त्री प्रताप सिंहः, आचार्यकुलस्य निदेशकः एल.आर सैनी, डॉ. भोला झाः, भगीरथ शर्मा, डॉ. हरिगोपाल शास्त्री, प्रकाशन अधिकारी किशोरीलाल रतूड़ी, शोध सहायक डॉ. सी.एस.आर. लिंगारेड्डी, प्रशासनिक अधिकारी लीला रावत, लेखाकार राधेश्यामः, सहायक पुस्तकालयाध्यक्षा रमा कठैत, मनीषा, गणेश फोन्दणी, दिव्या पालीवाल, विवेक पंचभईया, अजय जोशी, पंकज सिंह नेगी, कविता, दिनेष्ठा मेहरा, नरेन्द्रश्च इत्यादयः उपस्थिता आसन्।

**प्रथमपुटस्य शेषभागः**

## साहित्य–अकादमी–तिरुपतिराष्ट्रियसंस्कृतविद्यापीठयोः....

भारतभूषणरथेन कृतम्। प्रथमे दिने सत्रत्रयं सुसम्पन्नम्। प्रथमसत्रे काव्यपाठोऽजायत। यत्र अद्व्यक्षाः जि एस आर कृष्णमूर्तिमहोदयाः आसन्। डॉ राजकुमारमिश्रः, डॉ अरविन्दकुमारतिवारी, डॉ ऋषिराजपाठकः डॉ नारायणदाशः इमे कवयः काव्यपाठेन श्रोतृनमोहयन्। अस्य सत्रस्य संचालनं सि एच् नागराजन्महोदयेन कृतम्। अस्मिन्नेव काव्यपाठे प्रो रमाकान्तपाण्डेयमहोदयेन रमणीयं काव्यमश्रावि। येन सर्वेऽपि विमुग्धा अभवन्।

द्वितीयं सत्रम् आधुनिककाले शास्त्रलेखनमित्याख्यमासीत्। अस्य अध्यक्षाः प्रो रमाकान्तपाण्डेयमहोदयाः अभूवन्। पत्रप्रस्तोतारः पेन्नामधुसूदनः, दत्तात्रयमूर्तिः, पवनकुमारः सतुलुरि




इमे आसन्। अस्य सत्रस्य संचालनं ओ जि पी कल्याणशास्त्री आसीत्।

तृतीयं सत्रं कथावाचननामकमासीत्, यत्र अध्यपदमलमकुर्वन् एम एल नरसिंहमूर्तिमहोदयाः। कथावाचकेषु सुधाकरमिश्रः, गायत्रीमुरलीकृष्णः, उदयनहेगडे इमे आसन्। सवैरपि मनोरमकथाभिः श्रोतृणां मनास्यहरन्। सत्रस्यास्य संचालनं निरंजनमिश्रेण कृतम्।

द्वितीये दिने चतुर्थसत्रमासीत्। अस्य आधुनिकसंस्कृतकथावाचनसत्रे एस् सुदर्शनशर्ममहोदयाः अध्यक्षतामलभन्त। सम्पदानन्दमिश्रः, नौनिहालगौतमः, पराम्बा श्रीयोगमाया कथावाचनमकुर्वन्। सोमनाथदाशेन संचालनं कृतम्।

पंचमं सत्रम् आधुनिककाव्यपाठात्मकमासीत् यत्र राणे सदाशिवमूर्तिमहोदया अध्यक्षपदमलंकृतवन्तः। राधावल्लभशर्मा, शिवरामभट्टः, पंकजकुमारव्यासः आसन्। संचालनमस्य सत्रस्य के कादम्बिनीमहोदयया कृतम्।



समापनसत्रमतीव रमणीयमासीत्। समापनाभिभाषणं प्रख्यातसंस्कृतलेखकेन एच् एस् विश्वासमहोदयेन कष्तम्। मुख्यातिथित्वं वाइ एस् रमेशमहाशयेन निर्व्यूढम्। अध्यक्षीयमभिभाषणं जे रामकृष्णमहोदयेन कृतम्। धन्यवादज्ञापनं साहित्य–अकादम्याः सुकविना अनुपमतिवारिणा कृतम्। संचालकेन विद्यापीठस्थेन यशस्विना यशस्विना कृतम्। वक्तुं शक्यते यदेतत् सम्मेलनमतीव सुन्दरं प्रासंगिकं दर्शनीयं युवकवीनां कृते उपादेयमतिष्ठत्।

अस्मिन्नवसरे सायंकाले कुलपतिमहोदयेन समाहूतमिलनसंगोष्ठ्यां डॉ अरविन्दकुमारतिवारिणः सद्योविरचितं पंचाशिकात्रयं कुलपतिमहोदयस्य करकमलाभ्यां लोकार्पितम्। कुलपतिमहोदयेन एकेन मातृपंचाशिकावष्तेन प्रशंसा कृतास्य पंचाशिकात्रयस्येति। डॉ तिवारिणा काव्यामृतवर्षिण्या द्वितीयवर्षस्य प्रथमांकः सर्वेभ्यः प्रादीयत। किंच संस्कृतसंवादोऽपि सरागं सुकविभ्यो दत्तः।

# स्वतंत्रता दिवसे संस्कृतविदुषां राष्ट्रपतिपुरस्काराणां घोषणा

स्वतंत्रतादिवस्य समुपलक्ष्ये मानव-संसाधन-विकास-मंत्रालय भारत सर्वकारः 2017 एवं 2018 वर्षस्य भाषा संवर्धने सराहणीय योगदान प्रदानाय राष्ट्रपति पुरस्कृत विद्वान्सानां घोषणा अभवत्। उल्लेखनीयोऽस्ति यत् आस्मिन् वर्षे संस्कृत, परसियन, अरेविक, पालि संस्कृत, प्राकृत, उड़िसा, तेलुगु एवं मलयालम भाषया राष्ट्रपति पुरस्कारस्य घोषणा अभवत्। पुरस्काराय चयनित विद्वान्सानां सूचि अस्ति।

## वर्ष 2017

**संस्कृत**

1. प्रो. (डॉ.) के.वी.रामकृष्णामाचार्यालु
2. प्रो.रामचन्द्रझा
3. प्रो.दीप्तिशर्मात्रिपाठी
4. श्रीअनन्तशर्माभुवसनागीरि
5. प्रो.पी.सी.मुरलीमाधवन
6. प्रो.केदारनाथजोशी
7. प्रो.उमावैद्य
8. प्रो. (डॉ.) गोपीनाथमहापात्रा
9. डॉ. श्रीस्तलक्ष्मीनरसिमम्
10. डॉ.जगदीशप्रसादसेमवाल
11. प्रो.बद्रीनारायणपंचौली
12. श्रीएस.राममूर्तिशास्त्री
13. प्रो. बी.नरसिम्हाचार्यलु
14. प्रो.राधेश्यामचर्तुवेदी
15. प्रो.प्रभुनाथ द्विवेदी

**संस्कृत (अन्ताराष्ट्रीय)**

1. डॉ.चिरापतप्रपद्वविद्य

**अरेबिक**

1. प्रो.मौहम्मदनुमानखान
2. प्रो.कमसूदअहमद
3. मौलानानूरआलमअमीनी

**परसियन**

1. प्रो.(डॉ.) सैयदऐनूलहसन
2. प्रो. (डॉ.) सैयदारुकाया
3. डॉ.मौहम्मद फिरोज

**पाली**

1. प्रो.हरीशंकरशुक्ला

**प्राकृत**

1. प्रो.सागरमल जैन

**कन्नड़**

1. डॉ.तोगेरे वेकेटसुव्वाशास्त्रीवेन्कटाचार्लशास्त्री

**मलयालम**

1. डॉ.वी.आर.प्रभाबोधचन्द्रननैयर

### महर्षिबाद्रायनव्यास सम्मान 2017

**संस्कृत**

1. डॉ.कांदलाकदिम्विनी
2. डॉ.मुरलीकृष्णारावूरी
3. डॉ. उमानेपाल
4. डॉ.रामनारायणद्विवेदी
5. डॉ.शिवशंकरमिश्रा

**अरेबिक**

1. डॉ मसूदआलम

**परसियन**

1. डॉ अब्दुससलामजीलानी

**पाली**

डॉ.ज्ञानदित्यशाक्य

**प्राकृत**

1. सुमतकुमारजैन

## वर्ष 2018

संस्कृत

1. डॉ. समुद्रालावेकंटारंगारामनुजाचार्यलु
2. डॉ. रघुवीरवेदालंकार
3. प्रो.जयप्रकाशनारायणद्विवेदी
4. डॉ.बसंतकुमारएम.भट्ट
5. डॉ.बल्देवानंदसागर
6. डॉ.वीरेन्द्रकुमारमिश्रा
7. श्रीविनायकउद्दूपा
8. डॉ.गंगाधरननैयर जी.
9. प्रो. (डॉ.) वेदप्रकाशउपाध्याय
10. डॉ.शिवसागरत्रिपाठी
11. डॉ.वांगीपुरमनवनीतम्वेदान्तादेसिकन्
12. प्रो.कृष्णकान्ताशर्मा
13. डॉ.नरेन्द्रनाथपांडे
14. प्रो.(डॉ.)महावीरअग्रवाल
15. श्रीमृणालकाति वंद्योपाध्याय

**पाली**

1. डॉ.कर्मतोजसिंहसराओं

**प्राकृत**

1. प्रो.फूलचन्द्रजैन

**अरेबिक**

1. डॉ.गुलामवाहयाअजुंम
2. प्रो.(डॉ) एन.ए.मौहम्मदअब्दुल कादर
3. मौहम्मदवादुर रहमान

**परसियन**

1. डॉ.अख्तरमेहंदी
2. श्रीमतिसैयदाखुर्शीदफातिमाहुसैनी
3. डॉ.(श्रीमति)शैयदाअख्तरखान

**कन्नड**

1. डॉ.एम चिदानंदमूर्ति

**तेलगू**

1. डॉ.वेथावोलुरामब्रह्म्



# सम्पादकीयम्

**अयि विविधविद्यानदीकृतावगाहाः!**
**काव्यपीयूशपानमधुरवचनाः!**
**सादरं नमोनमः।**

भारतं विविधधर्मावलम्बिनां पवित्रदेशो विलसति संसारेऽस्मिन्। अस्ति काचिदस्य विशिष्टता, सा चास्य संस्कृतिरेवास्ति, या संस्कतमूला वर्तते। ज्ञानविज्ञानसम्पन्ना समादरणीयेयं संस्कृतभाषा पुरा मानवजीवनकर्मसु दरीदृश्यते स्म। अधुना तामेव स्थितिं कामयमानाः बहवोऽनुरागिणः प्रवर्तमाना सन्तीति विज्ञायते। किन्तु यदा कदा विरोधिनः संस्कृतक्षेत्रं किमपि एतादृशं कार्यं कुर्वन्ति यैः मानसं दूयते। स्यात् किमपि किन्तु संस्कृतप्रचारशीलैर्न व्यर्थं ध्यानं देयम्। न च वा कलहो विधेयः। स एव स्वलक्ष्यमवाप्नोति यः नकारात्मकवृत्तं न शष्णोति। अतः सर्वैरपि संस्कृतानुसन्धित्सुभिरवश्यमेव मिलित्वा कार्यं साधनीयम्।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।**

इति या भावना संस्कृते लभ्यते नान्यत्र सरसगिरा लब्धुं शक्यते। अयं निजः परो वेति गणना लघुचेतसाम्। उदारचरितानान्तु वसुधैव कुटुम्बकम्। इति मानवीयमूल्यं यदि कापि भाषा शिक्षयति सा संस्कृतमेवास्ति नापरा कापीति को न वेत्ति। अन्यच्च संस्कृतसम्मेलनादीनां संयोजका विनिवेद्यन्ते यत्तैः विश्रुतं सम्मेलनं सुविचार्यैव क्वचिदपि समायोजनीयम्। समयः अनुकूलो भवेत्सर्वेषाम्। न स्थानं विदूरं स्यात् न वा निकटमिति चिन्तनीयम्। यतोहि जनागम एव कार्यक्रमं सफलीकरोति। इदमपि अवधेयं सर्वैरपि यत् सम्मेलने कापि नवीनता स्यात्। केवलं पिष्टपेषणमेव न भवेत्। महान् व्ययः स्वलक्ष्यमवाप्नुयादिति चिन्तनीयम्।

विज्ञास्तु विदन्त्येव भवन्तो यत्केन कार्येण किं कीदृशं भवितुमर्हति। संस्कृता वयम् अकथितमपि जानीम एव। अतः कश्चिदन्यो न निन्दतु तादृशं कार्यं साधनीयम्। अस्माकं मतेन तु विख्यातसम्मेलने शास्त्रार्थो विधेयः, न तु प्रदर्शनार्थम् अपितु परजनबोधार्थमिति विभावये। मूलमेव वच्मि यत् संस्कृतज्ञा एव संस्कृतोन्नतिं सम्यक् कर्तुं शक्नुवन्ति, नापरः कश्चिदिति। इदं सर्वं निभाल्य सर्वमपि दुराग्रहं पक्षपातं भेदभावमुत्सृज्य संस्कृतोन्नयनाय प्रयतनीयम्। भारतीयता संरक्षणीया, विद्वांसः स्मरणीयाः, देशस्य संस्कृतिर्वधापनीया।

अस्तु जयतु संस्कृतं जयतु भारतमिति वदन्ती भवतो नमामि।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**[ १३ ] अथास्य द्वादशर्चस्य त्रयोदशसूक्तस्य मेधातिथिः कण्व ऋषिः । इध्मः समिद्धोऽग्निः; तनूनपात्; नराशंसः; इडः; बर्हिः; देवीरः; उषासानक्ता; दैव्यौ होतारौ प्रचेतसौ; सरस्वतीडा भारत्यस्तिस्रो देव्यः; त्वष्टा; वनस्पतिः; स्वाहाकृतयश्च द्वादश।**

**देवताः। गायत्री छन्दः । षड्जः स्वरः ॥**

अब तेरहवें सूक्त के अर्थ का आरम्भ करते हैं। इसके प्रथम मन्त्र में परमेश्वर के गुणों का उपदेश किया है–

**सुसमिद्धो न आ वह देवाँ अग्ने हविष्मघ्ते।**
**होतेः पावक यक्षि॥१॥**

अर्थ–इस मन्त्र में श्लेषालङ्कार है। जो मनुष्य वहुत प्रकार की सामग्री को ग्रहण करके विमान आदि यानों में सब पदार्थों के प्राप्त करानेवाले अग्नि की अच्छी प्रकार योजना करता है, उस मनुष्य के लिए वह अग्नि नाना प्रकार के सुखों की सिद्धि करानेवाला होता है॥१॥

अगले मन्त्र में शरीर आदि की रक्षा करनेवाले भौतिक अग्नि के गुण वर्णन किये हैं–

**मधुमन्तं तनूनपाद् यज्ञं देवेषु नः कवे।**
**अद्या कृणुहि वीतये॥२॥**

अर्थ–जब अग्नि में सुगन्धि आदि पदार्थों का हवन होता है, तभी वह यज्ञ वायु आदि पदार्थों को शुद्ध तथा शरीर और ओषधि आदि पदार्थों की रक्षा करके अनेक प्रकार के रसों को उत्पन्न करता है, तथा उन शुद्ध पदार्थों के भोग से प्राणियों के विद्या, ज्ञान और बल की। वृद्धि भी होती है॥२॥

अब अगले मन्त्र में मनुष्यों के प्रशंसा करने योग्य भौतिक अग्नि के गुणों का उपदेश किया है–

# अभिनवो मल्लिनाथः प्रो रमाकान्तपाण्डेयः

–डॉ अरविन्दकुमारतिवारी

संस्कृतसाहित्यमतीव श्रवणीयकाव्यैः सरसं रमणीयकथामधुरं ऋषिमुनिदिव्यदृष्टिसमष्द्धं ज्ञानविज्ञानवलितं सचेतसां मनांसि हरतीवेति विजानीमो वयमसंशयम्। अत्र कवयो मुनय इव मुनयः कवय इवाभान्ति। वेदोपनिषत्पुराणादिशास्त्रैः या ज्ञानपरम्परा लोकेषु प्रसारिता सैव रामायणमहाभारतरघुवंशादिकाव्यैः श्रोत्रपेयमापीयते नितरां रसलोलुपकविभ्रमरैरिति परिज्ञायत एव। यथा वेदादिशास्त्राणां व्याख्यानं भाष्यं विभिन्नविदुषां मतेन भिन्नतां याति तथैव काव्यानां भावो विविधविद्यापारंगतैः कोविदैः व्यक्तीक्रियमाणः समास्वाद्यते। नैकोऽपि समर्थो वस्तुतो भावप्रकटन इति वदतामविदुषां मतिभ्रमं खण्डयता श्रीमता प्रो रमाकान्तपाण्डेयमहोदयेन महामहोपाध्यायगोकुलनाथविरचितं शिवशतकं पदार्थप्रकाशिकाटीकया समलङ्कृतं विस्मयमातनुते। धन्योऽसौ महामहोपाध्यायो गोकुलनाथो बिहारराज्यान्तर्गतदरभंगाजनपदवसतिः महाकविर्येन वैदुष्यपूर्णं शतकमिदं प्रणीतम्। तत्रापि मान्योऽयं पाण्डेयो ज्ञानमहोदधिर्येन महता श्रमेण दर्शनीया पदार्थप्रकाशिकक टीका व्यरचि।



टीका ग्रन्थव्याख्या भवति। यदुक्तं कोषे –

टीक्यते गम्यते ग्रन्थोऽनया टीका। विषमपदव्याख्यारूपे ग्रन्थभेदे 1

इदं हि कार्यमतीव दुरूहं प्रतीयते। कविप्रणीतत्त्वप्रकाशनं न सरलमस्ति कृत्यम्। अत्र तु त एव साफल्यमधिगच्छन्ति ये गुरुवरकृपाप्रसादं सम्प्राप्य यशस्करीं पीयूषवर्षिणीं लेखनीमुत्थापयन्ति। ये हि बृहस्पतिसदृशान् गुरूनुपसेवन्ते त एव टीकां रचियतुं प्रभवन्ति। समधीतव्याकरणादिशास्त्रविद्यः निजविद्याग्राहिवृत्तिसन्तुष्टगुरुजनो मतिमान् प्रो पाण्डेयमहोदयोऽतिशेते विदुषोऽधुना येनेयं रमणीया टीकाकारि। अस्य पाण्डेयवर्यस्य शैली महाकविकालिदासकष्तीनां टीकाकारं मल्लिनाथं स्मारयति। पश्यन्तु शिवशतकस्य पदार्थप्रकाशिकां टीकामिमामिह विमृष्टाम्।

विततविविधसम्प्रदायशाख–
व्यतिकरवेष्टितमूर्तये नमोऽस्तु।
बहुतरजगदण्डबीजपूर–
प्रसवफलेग्रहिपादपाय तुभ्यम्।। 2

पदार्थप्रकाशिका– काव्यं न केवलं यशःप्रभृतिप्राप्तयेऽपितु शिवेतरनिवारणपुरस्सरं स्वेष्टार्चनद्वारा तत्परमपुरुषार्थभूतमोक्षप्राप्तयेऽपि भवति। शिवेतरक्षतिरितिकथनेन नित्यसुखात्मकस्य भगवत्संगतिरूपमोक्षस्य लाभ एव फलतो मनीषिणां काव्यशास्त्रविदामभिमतः। स च मोक्षलाभः शतकस्तोत्रादिपाठेन सम्भवत्येवेति पुराणादिप्रमाणसिद्धम्। अतश्च शतकश्लोकेषु स्वेष्टं शिवं स्तोतुकामस्तत्र भवान् सर्वतन्त्रस्वतन्त्रो महामहोपाध्यायो गोकुलनाथो वक्ति– विततविविधसम्प्रदायशाखाव्यतिकरवेष्टितमूर्तये, सम्प्रदाया एव शाखा इति सम्प्रदायशाखाः, वितता व्याप्ता विस्तष्ता वा विविधा अनेकाः सम्प्रदायशाखा यस्य स विततविविधशाखः, भगवान् वेदः। तेषां वेदानां व्यतिकरेण समूहेन, ऋगादिवेदास्तेषां शाखाभिश्च वेष्टिता आच्छादिता मूतिर्यस्य स विततविविधसम्प्रदायशाखव्यतिकरवेष्टितमूर्तिः, तस्मै। वेदस्य विविधशाखाभिः प्रशाखाभिश्च वर्ण्यविषयत्वेन अंगीककृतशरीरायेत्यर्थः। शाखशब्दोऽत्र समस्तामपि वैदिकवाङ्मयीं सषष्टिमात्मसात्करोति। 3

एवमेवात्र सर्वेषामपि पदानामर्थस्फोटनाय प्रो पाण्डेयमहोदयेन शेमुषीबलेन सफलता लब्धेति विलोक्यते चक्षुष्मद्भिरिति विभावयितुं शक्नोति मदीया प्रज्ञा।

इयं टीका कीदृशीति प्रमाणयद्भिः महाकवी राधावल्लभत्रिपाठिभिः अस्य काव्यस्य पुरोवागित्यत्र विलिख्यते–

महावाक्यायमानस्य महाकाव्यायमानस्य वा काव्यस्य पदार्थप्रकाशिकां व्याख्यां विरच्य महानुपकारो विहितः पण्डितप्रवरेण रमाकान्तपाण्डेयेन। इयं पदार्थप्रकाशिका संस्कष्तपरम्परायाः व्याख्यानमार्गस्य समुज्ज्वलं निदर्शनम्। 4

अस्या टीकात्मकव्याख्यायाः प्रशंसा कुर्वन्तो विलिखन्ति मान्या रामानुजदेवनाथमहोदयाः यत्

एतस्य व्याख्याकारो विद्वन्मणिरलंकारशास्त्रचुंचुरध्ययनपटिष्ठो विविधकौशलयुतो नाट्यशास्त्रविशारदस्सततं कर्मण्यभिरतः डॉ रमाकान्तपाण्डेयवर्यो नितरां प्रशंसाभाजनं वर्तते। 5

महामनस्विनां निजप्रतिभाजितसहृदयलोकानां सुकवीनामुदारचेतसां प्रो पाण्डेयमहोदयानामपराकषतिरस्ति, या महाकविगंगाधरशास्त्रिप्रणीतकाव्ये अलिविलासिसंलापे प्रौढा विद्वज्जनरंजनक्षामा व्याख्यानकुशला गंगानाम्नी टीका वर्तते। यत्र प्रो पाण्डेयस्य समुज्ज्वला दिग्दिगन्तव्यापिनी अनुपमा प्रज्ञा विद्योततेराम्। ममाग्रहोऽयं यदधुना नित्यं काव्यानि महाकाव्यानि वा विरच्यमानानि सन्ति, किन्तु टीका व्याख्यानं वा नैव क्रियमाणं दृष्टिपथमायाति। अस्यां परिस्थितौ प्रो रमाकान्तपाण्डेयमहोदयः प्रेरक इवावतीर्णो विद्यते। नवकवयः लेखकाः रचनकाराः अवश्यमेव कृतिद्वयं परिशील्य लाभान्विता भविष्यन्तीति मे मतिर्वदति। अस्तु विद्वान् टीकाकारो भवान् मम मतौ नूनमेव अभिनवमल्लिनाथो वर्तत इत्यत्र नास्ति सन्देहः। माता शारदा कण्ठे विराजताम्, भगवानाशुतोषो तुष्यतु भवति सततमिति कामयमानो निजां वाचमवसाययामि।

सन्दर्भः

1 वाचस्पत्यम्। 2 शिवशतकम्। 1
3 शिवशतकम् 1 श्लोकस्य पदार्थप्रकाशिका टीका
4 पुरोवाक् प्रो राधावल्लभत्रिपाठी
5 शिवं संवर्धताम् रामानुजदेवनाथः।

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल ( रेडीमेड ) ✪ रेशम साड़ी ( रिल्ड )
✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, ( उ० प्र० )
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोन:-0120-2631855, 9899334204

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| ● प्रचार संस्करण (अजिल्द) 23×36÷16 | मुदित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| ● विशेष संस्करण (सजिल्द) 23×36÷16 | मुदित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| ● स्थूलाक्षर सजिल्द 20×30÷8 | मुदित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# मोहराजपराजये दार्शनिकज्ञानम्

–डॉ. शैलकुमारी तिवारी
3523 – विजया गार्डेन्स,
बारीडीह, जमशेदपुर – 831017

प्रतीकसंस्कृतनाटककारेष्वन्यतमः श्रीयशःपालमहाभागः गुर्जरनरेशश्रीअजयदेवस्य सचिवपदेन यशोऽलभत। अस्य 'मोहराजपराजय' नाट्यरचना सर्वथा विशिष्टा। अस्मिन्नाटके मन्त्रिणा यशःपालेन तात्कालिक धर्मप्रचारार्थं तत्प्रसारार्थं वा तस्मिन्नेव प्रसंगे दैव्या सम्पत्या आसुर्याः सम्पदः विनाशो दर्शितः। क्रान्तिकारी नाटककारः स्वीयसामयिकग्रन्थनिर्माणकाले हेमचन्द्राचार्याश्रम निवासिनो जैनधर्मदीक्षितस्य चौलुक्याधिपतेश्चरित्रमाध्यमेन जैनधर्मप्रचारार्थं तत्प्रसारार्थं च महान्तं यत्नं कृष्तवान्,–

सम्यक्त्वधारी करुणैकसिन्धुर्बन्धुर्जनानां परमार्हतश्च।
चातुर्यगाम्भीर्यमुखैर्गुणौघैरगाधदेहो भुवनाधिवीरः।।[1]

तथा राज्ञः पणबन्धस्यापि मतिप्रकर्षस्वरूप पात्रमाध्यमेन जैनधर्मोक्ताभक्ष्यभक्षण – परदारसेवन, हिंसाप्रभृतीनां निवारणं तथा सप्तव्यसननिर्वासनं श्रीहेमचन्द्राचार्यसमक्षं प्रदर्शितवान्–

किञ्चाभक्ष्यमयं त्यक्त्वा, परनारीपराङ्मुखः।
स्वदेशे परदेशे च, हिंसादिकमवारयत्।।[2]

एवं कुमारपालं भावि तीर्थंकरस्वरूपेण पापकेतुं यश्चासीत् खलु मोहराजस्यामात्यमाध्यमेन जैनधर्मप्रसारकरूपेण नाटककारः अभिव्यक्तवान्।[3] श्रीचौलुक्य द्वारा अचलां सकलां पृष्वीं जिनमयीं विधातुकामस्य नाटककारस्य उद्देश्यमासीत् –

निर्वीराधनमुज्झितं विदलितं द्यूतादि लीलायितम्
देवानामपि दुर्लभा प्रियतमा प्राप्ता कृष्पासुन्दरी।
ध्वस्तो मोहरिपुः कृष्ता जिनमयी पृष्वी भवत्संगमात्
तीर्णः सङ्गरसागरः किमपरं तत्स्याद्यदाशामहे।।[4]

पुनश्च नाटककारः जैनधर्मस्य श्वेताम्बरदिगम्बरभेदेन द्वैविध्यमापन्नस्य जैन–सम्प्रदायस्य दिग्दर्शनं कारितवान्। यत्र जैनाचार्यहेमचन्द्रस्य विशेषणरूपेण श्वेताम्बर पदप्रयोगेण कविःरचनाकाले श्वेताम्बर जैनदार्शनिकानाम् उत्कर्षं प्रकटीकरोति, तत्र मोहराजपराजयमूले जैन दर्शनप्रथित दार्शनिकतत्त्वानाम् अनुशीलनमेव प्राधान्येन कारणरूपेण वर्णितमस्ति।[5] कुबेरोक्ति प्रसंगे गुरोरुपासनायास्तथा जैनदर्शनोक्त यम – नियम– आसन – प्राणायाम – प्रत्याहारादीनाञ्च पालनपूर्वकं वैराग्यमार्गानुसरणमेव श्रेयस्करत्वेनांगीकरोतीत्यस्य संकेतमपि कृतवान्।[6]

प्रचुरधनसम्पन्नकुबेरद्वारा जैनधर्मदर्शनोक्तपदार्थानां परिगणना अहिंसा – सत्य – अचौर्य – परदारागमन – मद्य – मांस – मध्वभक्षण –रात्रिभोजनाभावरूपेण लोभाभावप्रभृति स्वरूपेण कृष्ता वर्तते –

जन्तून् हन्मि न वच्मि नानृनतमहं स्तेयं न कुर्वे पर–
स्त्रीर्नो यामि तथा त्यजामि मदिरां मांसं मधुभक्षणम्।
नक्तं नाद्मि परिग्रहे मम पुनः स्वर्णस्य षट्कोट्य–
स्तारस्याष्ट तुलाशतानि च महार्हाणां मणीनां दश।।[7]

नाटककारयशःपालेन भोगात्मक प्रवृष्तीनां निन्दां कृत्वा सर्वजन साधारणस्य कृष्ते जैन दर्शनोक्त योगस्य सर्वथा उपादेयत्वं सूचितम्।[8] शुकनामकपात्रमाध्यमेन श्री हेमचन्द्रानुशासन द्वारा कुमारपालस्य पवित्रतायाः वर्णनमपि द्रष्टव्यमस्तीति विज्ञेयम् –

श्री हेमचन्द्रक्रमपद्मसेवा
पवित्रभालः स कुमारपालः।
यत्कीर्तिजन्मेव सुधामरीचि
र्जगत्तमो हन्ति महोविलासैः।।[9]

इत्थं च जैनाचार्यतीर्थंकरकृपामन्तरा मोहराजस्य पराजयः कथमपि न प्रभवति प्रभविष्यति वा। अतएव जिनाधीशस्य चरणकमलयोः भ्रमरो भूत्वैव कोऽपि मानवः विजयं प्राप्तुं सर्वथा शक्नोति। कविरपि तात्कालिकजैनधर्मस्यव्यावहारिकस्वरूपप्रकर्षस्य वर्णनं कृष्तवान्–

अन्तरेणजिनाधीशं कश्छेत्तुं मोहमीश्वरः।
असौ तु तत्पदाम्भोजे भष्ङ्गतीति ध्रुवं जयी।।[10]

जैनदर्शनोक्तध्यानस्वरूपाग्निप्रकाशेन मोहराजस्य कामादिसैन्यानां स्पर्शाभावः प्रतिपादितो वर्तते। अनेन च जैनदर्शनप्रोक्त ध्यानयोगस्य चरमोत्कर्षः प्रतीयमानो भवति।[11]

'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'।[12] एतद्धर्मशास्त्रोक्तलक्षणेन निःश्रेयसस्यैव धनस्वरूपकारणरूपेण कल्याणरूपनिःश्रेयसकारणस्य धर्मशरीरस्य च वर्णनं श्रूयते –'कल्याणं निःश्रेयसकारणस्य धर्मशरीरस्य'।[13]अनेन वचनेन कल्याणप्राप्तिरेव जैनधर्मस्य परमोद्देश्यमस्तीति प्रतीतिर्भवति। विवेकश्च वीतरागत्वमन्तरा नहि प्राप्तो भवति। विवेकोदयमन्तरा च दुर्व्यसनान्धकारपुञ्जमपि नहि सर्वथा विनश्यति। न्यायोपार्जितद्रव्य द्वारा शरीरपोषणपरायणानां जनानां क्षमालक्षणलक्षितायाः स्त्रियः सेवनं प्रकुर्वतां पवित्र कीर्ति प्रमोदादिकाध्यात्मिक आधिभौतिकाधिदैविकसुखानामपि समवाप्तिर्भवितुमर्हति। तेषां सुदृढो विश्वासः एतत्तथ्यं समुपवर्ण्य नाटककारः जैनदर्शनोक्तसांसारिकसुखानामपेक्षया वैराग्यस्यैव जैनदर्शनसम्बन्धि प्रमुखतत्त्वं घोषितवान् –

उच्चैः कारितवीतरागभवनव्याजेन रोमाञ्चितां
निःशेषव्यसनान्धकार पटलच्छेदेन पुण्येक्षणाम्।
न्यायोत्सङ्गसुखोपलालिततनुं वीक्ष्य क्षमायोषितं
युष्मद्गीतपवित्रकीर्तिविशदां मे स्यात्प्रमोदोदयः।।[14]

एतदनन्तरं सत्संगमहत्त्वं पाथोदस्वरूपोदाहरणद्वारा समुपवर्ण्य नाटककारेण अस्य महत्त्वं प्रदर्शितम्। जैनदर्शनञ्च सत्सङ्गमेकं पवित्रं तत्त्वं स्वीकरोति स्म। मद्यस्य योषिताञ्च सेवनेन इन्द्रस्य अपवित्रतायाः वर्णनं विधाय नाटककारेण परस्त्रीगमनस्य, परस्त्रीसेवनस्य मद्यप्रभृत्यपवित्रपदार्थानां त्यागस्य उपदेशो व्यधायि।[15] मोहराजपराजयस्यप्रथमाङ्कस्य प्रारम्भे एव श्लोकद्वयमाध्यमेन जिनेन्द्रनाभितो जायमानप्रथमतीर्थङ्करपार्श्वस्वामिप्रभृति परमात्मनां स्तुत्या जैनधर्मप्रतिपादकग्रन्थस्वरूपेणेदं नाटकं प्रतीयते।[16]

परमबोधिसत्त्वगुरुप्रवरश्रीहेमचन्द्रतो जैनधर्मस्य दीक्षां गष्हीत्वा तद्द्वारा च द्यूतादिदोषाणां निवारणञ्च विधाय प्रथमाङ्के एव एतत्सर्वं वर्णितम्।[17] नाटककारः सूत्रधारमाध्यमेन यशःपालं परमार्हतपदेन विभूषितं कृष्तवान्। अनेन अस्य जैनधर्मस्य ज्ञानमपि समुद्बोधितं भवति –परमार्हतेन यशःपालकविना विनिर्मितं मोहराजपराजयं नाम नाटकम्।[18] यशःपालः नाभिराजात्मजऋषभदेवप्रभष्तीनां जैनतीर्थङ्कराणां तदनुभरतेश्वराणाञ्च रामादितीर्थङ्कराणामपि पारस्परिकस्वरूपस्य दिग्दर्शनं कारितवान्।[18] प्रकृतनाटके जैनविहाराणां निर्माणस्यापि प्रसङ्गो मिलतीत्यपि विज्ञेयम्। राजा कुमारपालो जैनधर्मस्य परमसमर्थक आसीत्, इत्यस्य समर्थनात्मकं निदर्शनं प्रकृष्त नाटकेऽनेकस्थलेषु समवाप्यते –

जिनशासनप्रभावनविषयोपनिषण्णहृदयस्य।
अस्य नृपस्य व्यसने सान्निध्यं को न विदधाति।।[19]

जैनदर्शनस्य योगतान्त्रिकः स्वरूपम् – परमार्हतमन्त्रियशःपाल पञ्चमाङ्के अकस्मात् समागतामात्य द्वारा गुरुवर श्रीहेमचन्द्रेण प्रेषितं राज्ञः कुमारपालस्य विजयप्राप्ति हेतुभूतया जैनतान्त्रिकपद्धत्या विनिर्मितं योगशास्त्रनामक वज्रकवचं यादृशकवचधारणेन धारणकर्तुः सम्पूर्णान्यङ्गानि शत्रोः सर्वविधप्रहारेणाणि छिन्नानि–भिन्नानि नहि भवन्तीति, तत्कवचप्रदानवर्णनं मिलति। एवमेव वीतरागस्तुतिसंज्ञक विंशतिदिव्यगुलिकानामपि प्रसंगमाश्रित्य यादृश दिव्यगुलिकानां प्रसंगं मुखकमले निधाय धारणकर्त्ता पुरुषोऽपि पुरुषान्तराणां दृष्टावदृश्यतां गच्छतीत्यस्यापि विषयस्य वृष्तान्तं मिलति। एवञ्च मोहराजपराजयप्रसंगे जैनतान्त्रिकाचार्यश्रीहेमचन्द्रद्वारा वज्रकवचं दिव्यगुलिकाञ्च विनिर्माय तयोश्च तात्कालिकं दानं जैन–योगतान्त्रिकाणां चरमो व्यावहारिकः काल आसीदिति सूचयतीत्यपि व्याहर्तुं शक्यते –गुरुणा श्रीहेमचन्द्रेण भवतो युद्धश्रद्धालुमनसो योगशास्त्रं नाम वज्रकवचम्। अमुना हि संवृत्तसर्वाङ्गो न भिद्यते रिपुप्रहरण– परम्पराभिः। इमाश्च वीतरागस्तुतिसंज्ञा विंशतिर्दिव्यगुलिकाः। आभिर्मुखकमलमलङ्कृष्य स्थिताभिः पुरुषः परेषामदृश्यौ भवति।[20]

कौल दर्शनम्– वाममार्गभूतः प्रभूतः खलु कौलसिद्धान्तोऽस्मिन् नाटके लौकिक दृष्ट्या पापाऽपरपर्यायभूतेनाऽधर्मपदेन चाऽस्ति अभिधीयमानः। ते सर्वेऽपि कौलप्रभृति सिद्धान्ताः कौलसमष्टौ ग्राह्यकोटौ च समागच्छन्ति। यथा – 'अधर्म एव धर्मः'। 'अगम्य एव गम्यः'। 'पापमेव पुण्यम्'। इत्यादीन्येव वचनानि तत्र समुपलब्धानि भवन्तीत्यपि विदाङ्कुर्वन्तु भवन्तः। तदनुसारमेव यशःपालः कौलदर्शनस्य स्वरूपात्मकं परिचयं कौलपात्रद्वारा प्रदत्तवान् –

खाद्यते मांसमनुदिनं पीयते मद्यं च मुक्तसंकल्पम्।
अनिवारितमनःप्रसर एष धर्मो मया दिष्टः।।[21]

कौलदर्शनानुसारं मांसस्य दैनिक भोजनं, मद्यस्यापि यथेष्टं पानं, विवेकसम्पादनमन्तरैव अभक्ष्यभक्षणम्, अगम्यगमनम्, अपेयपानम्, अचोष्यचोषणम्, अलेह्यलेहनम्, स्त्रीगमनं सर्वेषु दूषित कर्मषु भोगमूलिकायाः शास्त्रजन्यविवेकज्ञानमन्तरैव मनोनुकूलपुण्यपापात्मकप्रवृत्तेः प्रमुखता सिद्ध्यति। अपि च कौलदार्शनिकवचनानुसारं पञ्चभिर्मकारैरेव वाममार्गावलम्बिनो जना लौकिकदृष्ट्या सर्वथा निन्दां प्रयान्ति। एतस्य धर्मस्य सामाजिकजनेषु विस्तृतः प्रचारः आसीत्। यस्योल्लेखं नाटककारमहोदयः 'एष तावत्कौल – सिद्धान्तः' इत्यनेन वाक्येन विहितवान्।

कापालिकं दर्शनम्– अघोरदर्शनस्य चास्ति एका शाखा यामनुसृत्य च केवलं श्मशानस्थाने संतिष्ठमानो जनः मृतजीवानां शवमांसस्य नित्य भक्षणं एवं मृतव्यक्तेर्नरमुण्डस्वरूपे कपाले मद्यं निधाय यथेष्टं पूर्णरूपेण पिबन्ति। ते च शैवाः कापालिकपदाभिधेयतां गच्छन्ति। 'कपालेन निर्वृत्तम् = कापालिकः' एतद् व्युत्पत्यनुसारं कपालस्थित मद्यसेवनतत्परंव्यक्तीनां जीवनक्रमः उपर्युक्तरीत्या परिचालितो भवेत्। एतेषां कापालिकानां स्वरूपवर्णनं खलु कापालिकपात्रमाध्यमेनैव नाटककारः वर्णितवान्। एतेषां नये (मते) मुक्तिरपि केवलं मद्यपानद्वारैव भवति। या च भुक्तिः सांसारिक–व्यावहारिकरूपेणापि चास्ति सर्वथा गर्हिता –

उत्तमपुरुषकपाले भुनक्ति यः पुरुषजाङ्गलं नित्यम्।
स प्राप्नोति शिवस्थानमिति नर कापालिना कथितम्।।[22]

घट–चटकम्– घटचटकदर्शनस्य स्वरूपस्य परिचयः आचार्यघटचटकदर्शित धर्मसिद्धान्तानुसारं मिलति। एतद्सिद्धान्तकथनानुसारं शरीरस्वरूपगुप्तगृहतः यो हि धार्मिको व्यक्तिविशेषो केनापि प्रकारेण जीवं दूरी करोति, स एव परमगतिस्वरूपं मोक्षं समवाप्नोति। अस्य धर्मस्य नामकरणं खलु घटकाचार्यः एव कृतवान् –

तनुगुप्ति गृहाज्जीवं पष्थग् यः करोति धार्मिकः कथमपि।
स प्राप्नोति परमगतिमितिघटचटकेन दर्शितो धर्मः।।[23]

एतद्दर्शनं सर्वजीवहिंसकदर्शनशब्देन व्याहर्तुं शक्यते। अथवा घटस्वरूपशरीरस्य लिङ्गिकस्य अर्थात् लिङ्गधारणकर्तृत्वावच्छिन्नस्य दर्शनस्य नामधेयं घटचटकमपि भवितुं शक्नोति।

रहमाणम्– नाटककारयशःपाल महोदयस्तात्कालिक प्रभावयुक्त रहमाणमपिदर्शनशब्देन कथयति। यस्य रहमाणदर्शनस्य स्वरूप परिचयः इत्थं मिलति। 'यथा गो दुग्ध पानेनास्ति न कोऽपि दोषः, एवं मांस भक्षणेपि नास्ति कोऽपि दोषः, तथैव लिङ्गिगहननेऽपि कस्यापि दोषस्य अस्तित्वमेव नास्ति। ते सर्वेऽपि दोषाः एतन्मते धर्मकोटौ समागच्छन्ति। इति धनिकेन पदेन यश्चास्ति सम्भवतो व्यक्ति विशेषः एतन्मार्गोपदेशकः अभवत् –

यथा पीयते गोक्षीरं पलाशने तथा च नास्ति स दोषः।
अत्र च लिङ्गिगहनने धर्मो दिष्ट इति धनिकेन।।[24]

सोऽयम् अर्थः अनेन पदेन व्यवस्थितो भवति, धनिकजनाः स्वीयप्रभावेण गोदुग्धम् उदाहृत्य कस्यापि जीवविशेषस्य मारणप्रयोगं विधाय मांसभक्षणात् नहि ते बिभ्यति।

चार्वाक – नाटककारःयशःपालः परं प्रसिद्धं चार्वाकदर्शनं यच्चास्ति सुरगुरुबष्हस्पतिद्वारा सर्वथा प्राक् निर्दिष्टम्। 'चारु वाक् यस्य स चार्वाकः' एतद् व्युत्पत्यनुसारं सुन्दरवचन समन्वितार्थयुक्तत्वेनचार्वाकदर्शनरूपेण सर्वजनसाधारणतया ख्यातिं समवाप्तस्यास्य दर्शनस्य वर्णनं कृतवान्। नास्तिकदर्शनशब्देन प्रसिद्धं दर्शनम् इदं ग्रन्थकारः नास्तिकशब्देन प्रोक्तवान्, इयमपि चास्ति अन्वर्थसंज्ञा। अर्थात् नास्ति परलोकः इति मतिर्यस्य स नास्तिकः, इतिव्युत्पत्यनुसारं अस्य दर्शनस्य इदमेव नामधेयं सर्वदा प्रसिद्धिं प्राप्तमस्ति। तथाहि –

न स्वर्गो नाऽपवर्गो वा नैवात्मा पारलौकिकः।

# संस्कृतकाव्यविमानयात्रा



-अरविन्दः

श्रीवेङ्कटेशरमणीयमहो स्वपुण्यै-
र्दृष्टं सुखास्पदमिदं नगरं नगस्थम्।
मित्रैस्सहाद्य कविभी रसवर्षिवन्द्यै-
र्भाग्यैर्भवन्ति कवयः प्रभुदर्शनानि।। 1

दिल्ल्या विमानमवरुह्य वयं समोदं
प्रीत्योत्सुका कवनकर्मकलाप्रवीणाः।
सम्प्रस्थिताः सहृदया अचलाम रात्रौ
पूर्वं शनैस्तदनु वायुजवेन याने।।2

विद्युत्प्रदीपविभया किल काशमाना
दिल्ली बभूव सहसा गगनोपमैषा।
आकाशवर्तिसुविमानगवाक्षनेत्रै-
र्विद्योतमाननगरी प्रविलोकिता नः।। 3

खद्योततुल्यनवदीपविभासमाना
सद्योऽभवन्नयनमार्गत एव दूरम्।
दिल्ली कवीन्द्रकुलवर्धनमानवेन्द्रा
दूरङ्गतापि हरते कवनप्रवीणम्।। 4

नीत्वा करे गिरिवरं गगने कपीन्द्रः
डिड्ये यथा गिरिसमो निशि हे कवीन्द्राः!
मन्येऽनयत् पवनपुत्रसमानयानं
श्रीवेङ्कटेशनगरं प्रति राजमानम्।।5

उच्चैर्गतं समनयत् ससुखं विमान-
मस्मान् यदा तिरुपतेर्निकटं तु चेन्नैम्।
दृश्यं मयात्र नवलं तु विलोकनीयं
दृष्टं तदत्र किल वर्णयितुं यतेऽहम्।। 6

नीचैस्समागतमिदं गगनाद्विमानं
रम्यं मदीयनयनैर्नन्नु वीक्षितं तत्।
गङ्गासमर्चनविधौ मम काशिकेयं
दीपावली वितनुते सुखराशिमेवम्।। 7

अद्य प्रयामि दिवसे निजमित्रवृन्दैः
साकं प्रसन्नमनसा सुविमानसंस्थैः।
सौख्यप्रदात्तिरुपतेः गगने सुदूरं
मन्ये वियद्घनकुले विचरन् विमाने।। 8

सूर्यप्रकाशनगरं प्रविशद्विमानं
सत्यं घनादिनगरं च विदीर्य शीघ्रम्।
काश्यां यथा तरणिका सलिले प्रमोद-
मातन्वती तरति नन्दयतीव चेतः।10

मित्राण्यहो परमसौख्यकरं मदीयं
जातं विशालनयना! गगने विमानम्।
ज्ञातं न कुत्र किमभूत् हरिवेङ्कटेश
शीघ्रं समाह्वय सुतं त्वरविन्दमत्र।। 11

लोकेऽद्वितीयमतुलं निजराष्ट्रविद्या-
पीठं श्रुतं तिरुपतेर्बहु शोभमानम्।
सूर्योपमं हरतु शिष्यतमोवितानं
श्रीवेङ्कटेश भगवन् कृपया तवैतत्।। 12

एतद्विमानधुना दिवि तोयदानां
देशे भ्रमन् रविगृहं प्रचलत् समानं
उड्डीयमानमचिरं कविचित्तवृत्ति-
माचोरयत् सहृदया हरतीव रम्यम्।। 13

श्वैतैर्घनैर्वकनिभैरतिथीकृतं तत्
उच्चैर्गतं मम मनश् चपलं च हत्वा।
हित्वा भुवं प्रडयते खगराजरूपं
दिव्यं विमानमधुना कवयो न सत्यम्?14

मन्येऽत्र तूलगिरयो विहरन्ति हन्त
यत्रेदमद्य शिशुवत् सुखदं विमानम्।
मन्दं प्रधावति हरत् हृदयं विशालं
वन्दे विमानबुधसर्जकमद्य कश्चित् 15

**ब्रिटिश कोलम्बिया विश्वविद्यालय वेंकुवर कनाडायां समायोजिते विश्वसंस्कृतसम्मेलने विशिष्टसत्रे कविसमवाये प्रस्तुतेयं कविता।**

# व्यंकूवराष्टकम्



-डॉ श्रेयांश द्विवेदी

विश्वस्तरे दृढतरां सुचिरां नवीनां,
संवर्धनाय नितरां सुसमागतास्ते।
सर्वेह्यमराः सुकवयो विबुधाः वरिष्ठाः ,
व्यंकूवरं विभवशीलमनोहरं तत्।। 1

आदौ तु दर्शनपरं शुभसत्रमेकम्,
वैज्ञानिकं विविधवाङ्मयपूरितं भोः!
व्याख्यात्मकं सुरुचिरं विशदं सुनेयम्,
भाषात्मकं हि निखिलं मनुधर्मशास्त्रम्।। 2

जैनागमं बहुविधा खलु वेदविद्या,
विद्वद्भिरेव रचिता श्रुतिशोधपूर्णा।
स्वीयैः प्रभावपरिपूरितदिव्यभावैः,
व्यंकूवरे प्रकटिता सरलस्वभावैः।। 3

वृक्षाः समे हि सरलाः सहजस्वभावाः,
स्वच्छन्दभावभरिताःसततं सुरम्याः।
स्वच्छं मनः सुजनता बहु वन्दनीया,
तस्माद्विभाति नगरं रमणीयरम्यम् ।। 4

संरक्षणं हि मनुजाः सततं चरन्ति,
तस्मान्मया सुविदिता सततं समृद्धिः।
मार्गे सदैव भवने निजकर्मभूमौ,
व्यंकूवरे प्रकृतिरस्ति सदानुकूला।। 5

फुल्लानि सन्ति कुसुमानि सुशोभितानि,
दूर्वाश्च वर्णभरिता हरिता विचित्राः।
उद्यानमस्ति रुचिरं सुविहारयोग्यम्,
व्यंकूवरं सुखमयं प्रतिभाति नित्यम्।। 6

व्यापारमात्रमभिलक्ष्य समाचरन्ति,
एकाकिनः सुरुचिरं खलु चिन्तयन्तः।
अश्वत्थवृक्ष इह नैव वटो न दृष्टः,
दिव्यं व्यवस्थितमितः सुविचारणीयम्।। 7

वायुः सदा प्रवहतीह मुदा सुशीलः,
नीरं सुपावनमतीव मनोहरञ्च।
वृष्टिःकरोति धवलं सकलं विशालम्,
व्यंकूवरस्य परिपूरितदिग्विभागम्।। 8

---

मन्ये प्रशान्तजलधौ च तरङ्गभङ्गः
सन्दृश्यते नयनमोदकरो विलोलः।
श्रीकृष्णवाहननिभे गरुडायमाने
संस्थस्य मे सपदि हे कवयो विमाने।। 16

व्यर्थं वदन्ति बहवो विबुधाः सगर्वं
जीवन्न याति मनुजः ननु नाकलोकम्।
किन्त्वद्य बालकवरोऽस्मि मुदा प्रयातः
जीवन् सुखेन विहरामि शचीन्द्रदेशे।। 17

मन्ये सुधाब्धिरहहा दिविषद्दुलोके
नित्यं वहन् दिविषदाममरत्वमेवम्।
रक्षन् विदग्धमहतां सुखयन् मनांसि
दृष्टो विमानभवनादचिरं सुपुण्यात्।। 18

श्रीकालिदासविरही ननु यक्षपुत्रः
सत्यं जगाद वचनं गृहिणीसुखाय।
मेघं विलोक्य सहसा कुसुमोपहारैः
सन्देशदाननिपुणं मदनार्तचेताः।। 19

देवा जनांस्तु विरचय्य धरार्थमेते
विज्ञा वसन्ति चतुराः निखिलाः कवीशाः!
श्रीमद्वियद्घनमण्डलतुष्टचित्ताः
ज्ञातं मयाद्य सकलं प्रचुरं सुवृत्तम्।। 20
( तिरुपतिहैदराबादमध्ये विमान एव 3:45 मध्याह्ने)

# कपोतपालिका



डॉ.राजेन्द्रत्रिपाठी रसराजः

कदा किं भविष्यति न जानामि बन्धो!
गता सा यया चाद्य विलपामि बन्धो।1।

मया पालिता पोषिता दर्शिता या।
स्वनीडप्रवेशाय विजहामि बन्धो।2।

गृहे छादनोपरि विहंगालये मे।
अण्डोद्भवं चात्र पश्यामि बन्धो।3।

नवः नवदिनं सूक्तिमाश्रित्य लोके ।
पुराणं नु नित्यं विजल्पामि बन्धो।4।

सदा सम्मुखं प्रेक्ष्य तुष्टिम्मयाप्ता।
परं दूरमालक्ष्य क्रन्दामि बन्धो।5।

विडालैर्नुकतिधा गृहे गोपिता सा।
बुभुक्षार्थिनं बत कथं पामि बन्धो।6।

कपोतार्तरसराजकवितां रचयितुम्।
स्वमित्रानुमत्याद्य गायामि बन्धो

# दुःखं मे



डॉ. राजकुमार मिश्रः

दिनेऽन्यस्मिन् भवेन्मुक्तिर्व्यथातो जात्विति भ्रान्त्या
कथञ्चिद् जीवतो यातं वयो यातं न दुःखं मे ।।1।।

मनस्तः चिन्तितः कालः त्वया साकं व्यतीतो यः
प्रियेऽप्राप्योऽभवत् तादृक् प्रयत्नेऽप्यत्र दुःखं मे ।।2।।

अपास्तुं दीनतां नद्धोऽसि बन्धो ! प्राणिनां चेत् त्वम्
विशेषे ते स्थितां वर्गे रुचिं दृष्ट्वाऽद्य दुःखं मे ।।3।।

परागे कीदृशास्वादोऽनुवक्तुं सक्षमो भृङ्गः
इति ज्ञात्वाऽपि घूकानां सुमे वासोऽद्य दुःखं मे ।।4।।

सरस्वत्या गृहं लक्ष्मीकृतं तत्सेवकैरेतत्
प्रबद्धा रौति वाक्सीताऽद्य भीता यत्र दुःखं मे ।।5।।

सुदूरं फेरवान् कर्तुं समर्थो गर्जनेनैव
तथाप्युद्योगतश्शून्योऽटवीराजोऽस्ति दुःखं मे ।।6।।

# भारतगीतं



-सचिनत्रिपाठी
वाराणसी

खण्डता न क्रियताम्
अखण्डता विधीयताम्
भारताय सर्वदा स्वजीवनं प्रदीयताम् ।।
जातिधर्मभेदकाः
एकता विखण्डकाः
सभ्यभारते कथं
सुपूजिताः प्रतिष्ठिताः।।
विश्ववन्द्यभारते
सर्वश्रेष्ठभारते
नैव लोक्यते सुभद्रमानवः
कथं सखे!।।
सत्यभाषणेक्षमाः
असत्यभाषणे रताः
ते हि पूज्यभारते निपीडयन्त्यनारतम् ।।
गीतमेव गीयताम्
सर्वदैव प्रीयताम्
भारताय सर्वदा स्वजीवनं प्रदीयताम्।।

# संस्कृतसाहित्यविद्वज्जनसम्मानः

अखिल–भारतीय–साहित्यपरिषद्, लोकभाषा–प्रचार–समितिः, अजयमेरुश्च इत्येतयोः संयुक्ततत्त्वावधानेन दि.28 जुलाई 2018 इति तिथौ राजस्थानप्रान्तस्य अजयमेरुस्थचारणविद्यापीठे गुरुपूर्णिमा इति उत्सवस्यावसरे समायोजिते विद्वज्जन–सम्मान–समारोहे संस्कृतभाषायाः प्रचार–प्रसारार्थं संस्कृतसाहित्यस्य सृजनात्मकगतिविधिषु योगदाननिमित्तं च राजस्थानसर्वकारस्य राजकीयस्नातकोत्तरमहाविद्यालयः, बून्दी इत्यत्र सह–आचार्यः संस्कृतविभागाध्यक्षश्च इति पदम् अलंकुर्वाणः उत्कलप्रान्तस्य भद्रकमण्डले लब्धजन्मा डॉ. पूर्णचन्द उपाध्यायः लोकभाषाप्रचारसमितेः राष्ट्रिय–अध्यक्षेण डॉ. सदानन्ददीक्षितमहोदयेन सुप्रसिद्धवेदविद्याविशारदेन पं. बद्रीप्रसादपंचोलीमहाभागेन च लोकभाषाप्रचारसमितिपक्षतः "संस्कृतलोकप्रज्ञा" एवं अखिल–भारतीय–साहित्यपरिषदपक्षतः "संस्कृतसाहित्यविद्वज्जनसम्मानं" च इत्येताभ्यां सभाजितः।

लोकभाषाप्रचारसमितेः राष्ट्रिय–अध्यक्षस्य डॉ. सदानन्ददीक्षितमहोदयस्य प्रेरणावारिणा प्रेरितेन श्रीमता उपाध्यायेन केन्द्रीय–संस्कृत–प्रशिक्षकरूपेण विगतपंचत्रिंशदवर्षेषु संस्कृतभाषायाः लोकभाषात्वसंसिद्धये राष्ट्रस्य विभिन्नप्रदेशेषु संस्कृतसम्भाषणशिविराणां, प्रशिक्षणशिविराणां च सफलसंचालनपूर्वकम् आयोजनं कृतम्। एतदतिरिच्य नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानस्य कुलपतिमहोदयैः मनोनीतेन श्रीमता उपाध्यायेन 2011 ईस्वीतः 2015 ईस्वीं यावद् राजस्थानप्रान्तस्य प्रान्त–संयोजकरूपेण अनौपचारिक–संस्कृत–शिक्षणकेन्द्राणां संयोजने स्वकीया सक्रियभूमिका प्रदर्शिता। संस्कृतभाषाव्रतिना डॉ. उपाध्यायेन संस्कृत–भारती द्वारा संचालितसंस्कृतभाषाप्रचारात्मकविविधगतिविधिषु अपि सहयोगात्मिका भूमिका उह्यते।

संस्कृतसाहित्यस्य सर्जनायाम् अस्य "चक्रपाणिविजयमहाकाव्यस्य समीक्षात्मकमध्ययनं संस्कृतटीकोपेतं सम्पादनं च, श्रीकृष्णलीलामृतम् (संस्कृतटीका भाषार्थश्च), संस्कृतसाहित्ये पर्यावरणविज्ञानम्(संपादनम्)" इति त्रीणि पुस्तकानि प्रकाशितानि, अपि च "आचार्यराधावल्लभीयसंस्कृतसाहित्ये पर्यावरणविज्ञानम्" इति पुस्तकं प्रकाशनाधीनं वर्तते। एतल्लिखितानि त्रिंशदधिकानि शोधपत्राणि, ग्रन्थसमीक्षणानि, आलेखाः, लघुकथाः, अनूदितकथाः, नैकानि स्वरचितानि अनूदितानि च संस्कृतलघुकाव्यानि सागरिका, आरण्यकम्, स्वरमंगला, दृक्, पैनासिया, शब्दार्णवः, कथासरित्, संस्कृत–प्रतिभा, पद्यबन्धा आदिषु पत्रिकासु प्रकाशितानि। अनेन पंचविंशतिसंख्यकेभ्य अधिकासु राष्ट्रियासु, अन्ताराष्ट्रियासु च संगोष्ठिषु, अखिल–भारतीय–प्राच्यविद्यासम्मेलनं, विश्वसंस्कृतसम्मेलनं चेत्यादिषु नैकवारं भागः गृहीतः। स्वयमपि अनेन विश्वविद्यालयानुदानायेगस्य राजस्थानसंस्कृत–अकादम्याश्च आर्थिकसहयोगेन राष्ट्रियसंगोष्ठीद्वयम् आयोजितम्। एतदर्थम् अभिनन्दयति विदुषम् एनं कथासरित् ।

**प्रस्तौता– डॉ. निरंजनसाहुः**
संस्कृतजिलाशिक्षाधिकारी, राजस्थनसर्वकारः, एवं
सचिवः, लोकभाषाप्रचारसमितिः, राजस्थानम्

## भारतीयसंस्कृत्याः संरक्षिका संस्कृतभाषा सर्वैः पठनीया- डा0 सुशीलः

सीवान(बिहार)। संस्कृतभाषा सर्वासां भाषाणां जननी भारतीयसंस्कृतेः प्राणस्वरूपा चास्ति। अनेन संस्कृतभाषायाः विपुलं गौरवं स्वमेव सिद्धयति। देवभाषा,अमरवाणी नाम्ना विख्याता संस्कृतभाषायाः प्रचार–प्रसाराय सवर्द्धनाय च अगस्तमासे तृतीयदिनांके(03/08/2018) शुक्रवासरे संस्कृतमेव जीवनम् -आमुखपटले चतुर्थसंस्कृतप्रश्नोत्तरी प्रतियोगिता आयोजिता।अस्याः प्रतियोगितायाः आयोजकः बिहारस्य सीवानतः डा0 सुशीलनारायणतिवारीवर्यः। आयोजकः डा0 सुशीलः उक्तवान् यत् भारतीयसंस्कृतेः मूलाधारः संस्कृतभाषैव वर्तते।एषा भाषा वैज्ञानिकी भाषा अस्ति। अतः भारतीयसंस्कृत्याः संरक्षिका संस्कृतभाषा सर्वैः पठनीया।प्रतियोगितायाः सञ्चालनं महेशकुमारः कृतवान्। सहायकौ दीपकवात्स्यः महेशकुमारश्च। डा0 कुन्दन मिश्र अमित ओली च निर्णायकौ।

रविवासरे (05/08/2018) पुरस्कारस्य उद्घोषणा अभवत्। तत्र प्रथमे स्थाने विजयकुमारः (हरियाणातः),द्वितीयस्थाने सुखवीर चम्बा(हिमाचलतः), तृतीयौ विमलपाठकः (वाराणसीतः),साक्षी चौरसिया(देहलीतः) च क्रमशः वर्तन्ते।

समेभ्यः विजेतृभ्यः पुरस्कारप्रायोजकेन चिन्मयसुशीलेन(बिहारतः) पुरस्कारत्वेन प्रतियोगिपरीक्षासु अतीवोपयोगिपुस्तकानि दास्यन्ते।

## संस्कृतमेव जीवनम् आमुखपटले संस्कृतसामान्यज्ञानप्रतियोगिता सम्पन्ना

-डा0सुशील नारायण तिवारी

सीवान(बिहार)। संस्कृतभाषा भारतस्य आत्मा अस्ति। एषा हि सुरभारती कथ्यते। मानवजीवने अस्याः अध्ययनम् अत्यावश्यकम्। संस्कृतभाषा अतीव सरला मधुरा च अस्ति। अस्मिन् काले संस्कृतस्य उत्थानं समीचीनम् वर्तते।संस्कृतभाषायाः संवर्द्धनाय प्रसाराय च बृहस्पतिवासरे 'संस्कृतमेव जीवनम्' आमुखपटले तृतीयसंस्कृतप्रश्नोत्तरी–प्रतियोगिता आयोजिता।बिहारस्य सीवानतः डा0 सुशील नारायण तिवारीवर्यः अस्याः प्रतियोगितायाः आयोजकः। डा0 तिवारीवर्यः उक्तवान् यत् एषा भाषा प्राचीना,चिरनवीना,धार्मिकी च अपि पूर्णव्यावहारिकी।अतः सर्वैः पठनीया। प्रतियोगितायाः सञ्चालनं दीपकवात्स्येन कृतम्। प्रतियोगितायां सहयोगं दीपकवात्स्यः ,नीलमपात्रा,रवि सोनी च कृतवन्तः।

शनिवासरे पुरस्कारस्य उद्घोषणा अभवत्। तत्र प्रथमस्थाने सौरभशर्मा(हिमाचलप्रदेशतः),द्वितियस्थाने धीरजशास्त्री(बिहारतः) तथा तृतीयस्थाने नवीशर्मा(हिमाचलतः) क्रमशः वर्तन्ते।

समेभ्यः विजेतृभ्यः पुरस्कारप्रायोजकेन चिन्मयानन्देन(बिहारतः) पुरस्कारत्वेन प्रतियोगिपरीक्षासु अतीवोपयोगिपुस्तकानि दास्यन्ते।

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्णं कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमम्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रियन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम् इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।


Girish Kumar Bansal,Manager

**Vidya Deep Public School**
(Govt. Recognised)
C-400/A, Main Market
Bhajan Pura, Delhi-110053
Mob.: +91-9555955591
+91-9810067099,+011-22563764


## वन्द्यस्सदासावटलो विहारी



डॉ.विमलेन्दुत्रिपाठी
देवघरम्

नेता विनीतः कुशलश्च वक्ता
साहित्यसेवी गुणवान् रसज्ञः।
नीतौ सदा यः प्रथितोयशस्वी
वन्द्यः सदासावटलोबिहारी।। 1

राष्ट्रे समस्ते किल यस्य मानः
पक्षे विपक्षे तु समानभावः।
नेत्रे स्वराष्ट्रस्य विकासभावः
वन्द्यः सदासावटलो बिहारी।।2

त्यागेन नैजेन सृतं यशस्ते
संपूर्ण राष्ट्रे वितनोति मोदम्।
पूर्वप्रधानः मम भारतस्य
वन्द्यः सदासावटलो बिहारी।।3

यस्य प्रभावाद् बहवो मनुष्या।
कार्ये नये दत्तधियो बभूवु।।
हा हन्त !यातः प्रखरो मनस्वी
वन्द्यः सदासावटलो बिहारी।। 4

देशेऽस्मदीये विलपन्ति सर्वे
सर्वत्र शून्यं न तथास्ति शान्तिः।
रुदन्ति केचित् बहुशः स्मरन्तो
वन्द्यः सदासावटलो बिहारी।। 5

## रमणीयप्रकरणं मालतीमाधवम्

(तर्ज/राग - हम कथा सुनाते राम सकल गुण धाम की ....)



डॉ धनञ्जयमिश्रः

अयि ! सखि ! श्रृणु मे वचनं प्रीतिसुधामयम् ,
रमणीयप्रकरणं मालतीमाधवनामकम् ।
(1) पुराह्यपि काले ब्राह्मणबालौ देवरातो भूरिवसुः,
सखि ! ताभ्यां प्रीतिसमन्वितवचनं कल्पितम् ।
विद्धामो विवाहं मालतीमाधवत्सलम् ।। 1 ।।
रमणीयप्रकरणम् ............
(2)भूरिवसुः पद्मावतीमन्त्री देवरातो विदर्भजः,
पद्मावतीनृपतेः सचिवो जर्जरनन्दनः ।
तन्मनो मालतीकामेनास्स्ति सुपूरितम् ।। 2 ।।
रमणीयप्रकरणम् ............
(3)माधवमित्रं ननु मकरन्दो नन्दनभगिनी मदयन्तिका,
सा मकरन्देन सिंहास्स्क्रमणाद् रक्षिता।
अथ तयोरपीदं चरितं प्रेमसुधामयम् ।।3।।
रमणीयप्रकरणं ............
(4)अघोरकण्ठो बलिपूजायै हारितवान् खलु नायिकाम्,
विनिहत्य पिशाचं मालती माधवरक्षिता।
अथ प्रारभामहे दिव्यं मालतीमाधवम् ।। 4।।
रमणीयप्रकरणं ...............



# मानवकल्याणाय अद्यापि वैदिकज्ञानस्य प्रासंगिकता

**डॉ. रणजित बेहेरा**

डलासनगरम्। 'विश्व-वैदिक-अध्ययन-परिषद्'(World Association for Vedic Studies - WAVES) इत्याख्यया संस्थया 'मानवकल्याणाय वैदिकज्ञानस्य प्रासंगिकता'







इति विषयमाधृत्य त्रयोदशान्ताराष्ट्रियवैदिकसम्मेलनम् अमेरिकायाः डलासनगरस्थ-ब्रूकहेवन-महाविद्यालये 2.8.2018 तः 5.8.2018 पर्यन्तं साफल्येन समायोजितम्।

सम्मेलनस्यास्योद्घाटनं भारतस्य कासुंलजनरल डॉ. अनुपम रे-महोदयेन विहितम्। 'वर्ल्डएसोसिएशनफार्वैदिकस्टडीज' (WAVES) इत्यस्याः संस्थायाः अध्यक्षःश्रीयुतः शशिकेजरीवालमहोदयः सम्मेलनविषयोपस्थापनेन साकमेव समेषामतिथीनां विदुषां प्रतिभागीनाञ्च स्वागतं व्यदधात्।

उद्घाटनभाषणे मुख्यातिथिपदमलंकृवता डॉ. रे-महोदयेन उदीरितं यत् सांप्रतिके समये विश्वेऽस्मिन् विश्वे वैदिकज्ञानस्य प्रासंगिकता वर्तत एव। सारस्वतातिथिपदमलंकृतवान् वैदिक एकेडमी ऑफ साइंसेज एंड आर्ट्स (VASA), वैंकूवर, कनाडा इत्यस्याः संस्थायाः संस्थापकः 'कवीन्द्र ऋषिः' इति नाम्ना प्रख्यातः श्रीयुतः जेफरी आर्मस्ट्रांगवर्यः। तेन निगदितं यत्सुप्रसिद्ध-वैदिकज्ञानार्थं भारतदेशोऽसौ भाग्यशाल्येव। उद्घाटनसत्रस्याध्यक्ष्यपदं निर्व्यूढवान् अमेरिकास्थायाः 'जॉर्जिया इंस्टीट्यूट ऑफ् टेक्नोलॉजी' इत्यस्याः




संस्थायाः एयरोस्पेस इजीनियरिंग-विभागस्य आचार्यः डॉ. नारायणन कोमेरथमहोदयः।

सम्मेलनेऽस्मिन् प्रो. वेद पी. नन्दा (डेनवर विश्वविद्यालयः, अमेरिका), डॉ. डेविड फ्राली(संस्थापकः निदेशकश्च, अमेरिकन इंस्टीट्यूट ऑफ वैदिक स्टडीज, न्यू मैक्सिको, अमेरिका), डॉ. जॉन हेगेलिनः(महर्षि-प्रबंधन-विश्वविद्यालयः, फेयरफील्ड, अमेरिका), डॉ. सुभाषकाकः(ओकलाहोमा स्टेट यूनिवर्सिटी, स्टिलवॉटर, यूएसए), प्रो. शशितिवारी (दिल्ली-विश्वविद्यालयः, दिल्ली, भारतम्), श्रीयुतः राजीवमल्होत्रा (संस्थापकः, इन्फिनिटी फाउंडेशन, प्रिंसटन, यूएसए)-प्रभृतीनां वैदिकविदुषां व्याख्यानान्यायोजितानि। पुनश्चात्र त्रयोविंशति-सत्रेषु पञ्चाशदधिकशोधपत्राणि प्रस्तुतानि विविधैर्बुधैः। पञ्च आधारवक्तव्यानि अपि आयोजितानि। चतुर्दिवसीयान्ताराष्ट्रियसम्मेलनेऽस्मिन्विश्वस्यविभिन्नेभ्यःदेशेभ्यः200विद्वांसः भागंगृहीतवन्तः। विविधेभ्यः देशेभ्यः अध्यापकाः, वैदिक-विद्वांसः युव-शोधार्थिनश्च शोधपत्राणि प्रस्तुतवन्तः, तद्यथा प्रो. बी. एन. नरहरि आचारः (अमेरिका); श्रीयुतः धीरु शाहः(अमेरिका);डॉ. क्रिस्टा आर नोबलः (अमेरिका); प्रो. बलरामसिंहः (अमेरिका),डॉ. संहिताशास्त्री अर्जुनप्रसादः वस्तोला (नेपालम्); डॉ. भक्तिनिष्कामशान्ता (बैंगलोरम्, भारतम्); श्री नीलेश नीलकंठ ओकः (अमेरिका);डॉ. कल्याणकुमारचक्रवर्ती (भारतम्); प्रो. सी. उपेन्द्रावः(जे.एन.यू, दिल्ली, भारतम्);डॉ. हरिराममिश्रः (जे.एन.यू, दिल्ली, भारतम्); श्रीमती शाहना सिंह (सिंगापुरम्);डॉ. सेतुरामन राममोहनः (सरस्वती रिसर्च सेंटर, चेन्नई, भारतम्); श्रीमती कमलेश कपूर (अमेरिका); डॉ. रणजित बेहेरा (दिल्ली-विश्वविद्यालयः, दिल्ली, भारतम्)।

# संस्कृतसप्ताहोत्सवः

अक्की वर्मा, (संस्कृम विभाग)

संस्कृानुरागी छात्राणां अध्यापकानां च मध्ये एन.के.बागड़ोदिया पब्लिक विद्यालये अगस्तमासे (6.08.18-10-08-18) संस्कृत सप्ताहस्य आयोजनं अभवत्। अस्मिन् कार्यक्रमे के जी कक्षातः दशमीकक्षा पर्यन्तं छात्राः भागग्रहं अकुर्वन्। संस्कृतसप्ताहे विविधः प्रतियोगिताः अभवन् यथा श्लोकोच्चारणं, तम्बोला क्रीडा, पात्र







परिचयः, नाटिकाभिनयः प्रश्नमंचश्च। विद्यालयस्य प्रधानाचार्यायाः संस्कृताध्यापिकायाः (श्रीमती अक्की वर्मा) सांनिध्ये अगस्तमासस्य दशतारिकायां संस्कृतसप्ताहस्य समापन समारोहः आयोजयत् ।

मुख्यातिथिः डॉ. श्रीमन्तः रमाकान्त शुक्ल महोदयः विद्यालयस्य प्रधानाचार्या च दीप्रज्ज्वालनं कृत्वा कार्यक्रमस्य शुभारम्भं अकुरुतां विजेतारः छात्राः च पुरस्कारान् अलभन्त।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**




अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।